श्रीगणेशायनमः अथातश्चरणव्यूहोच्चारव्याख्यास्यामस्तत्रयदुक्तंचातुर्वेद्यंचत्वारोवेदाविज्ञाताभवंतितत्रऋग्वेदोयजुर्वेदःसामवेदोथर्ववेदश्चेतितत्रऋग्वेदस्याष्टभेदाभवंतिचर्चाश्रावकश्चर्चकःश्रवणीयपारःक्रमपारःक्रमषठःक्रमजटाक्रमदंडश्चेतिचतुष्पारायणमेतेषांशाखाःपंचभवंत्याश्वलायनीसांख्यायनीशाकलाबाष्कलामांडूकाश्चेतितेषामध्ययनमध्यायाश्चचतुःषष्टिर्मंडलानिदशैवतु। वर्गाणांपरिसंख्याकंद्वेसहस्त्रेषळूत्तरे॥२००६॥सहस्त्रमेकंसूक्तानां १०००निर्विशंकंविकल्पितं॥दशसप्तसुपक्वंतेसंख्यातंवैपदक्रमं॥एकशतसहस्त्रंवाद्वित्रिपंचाशत्सहस्त्रार्धमेतानि॥चतुर्दशवासिष्ठानामितरेषांपंचाशीतिः॥क्रमकालेतुवेष्टव्यंचतुस्त्रिंशत्सहस्त्राणितु।द्विरंडानांसहस्त्राणांद्वात्रिंशाळोडशोत्तरा॥चत्वारिंशा॥चत्वारिंशत्सहस्त्राणिद्वात्रिंशतंचाक्षरसहस्त्राणि।ऋचांदशसहस्त्राणिऋचांपंचशतानिच॥ऋचामशीतिपादश्चैतत्पारायणमुच्यते॥एकर्चएकवर्गश्चएकश्चनवकस्तथा॥द्वौवर्गौतुदृचौज्ञेयौऋक्त्रयश्च१००शतंस्मृतं॥चतुर्ऋचांपंचसप्तमधिकंचशतंतथा१७५पंचर्चं५द्विशत्युक्तंसहस्त्रंरुद्र२१॥संयुतं॥पंचचत्वार्यधिकंतुषड्ऋचांचशतत्रयं३४५सप्तर्चस्यशतंज्ञेयंविंशतिश्चाधिकास्मृता।अष्टऋचांतुपंचाशत्यंचाधिक५५तथैवच।दशाधिकद्विसहस्त्रं२०१०पंचशाखास्कनिश्चिता॥वर्गःसंज्ञानसूक्तस्यचत्वार४श्चात्रमीलिताः॥एवंपारायणेप्रोक्ताऋचासंख्येननन्यूनतः॥१॥ओंमित्येकाक्षरंब्रह्मनादबिंदुकलात्मकं॥त्रिदेवत्वंत्रिमात्रंचस्फुटंविष्णुसनातनं॥तंसर्वंजंजगत्सेतुंपरमात्मानमीश्वरं॥वंदेनारायणंदेवंनिरवद्यंनिरंजनं॥कृष्णद्वैपायनंवंदेगुरुंवेदमहानिधिं॥येनचरणव्यूहेषुशाखावेदमिदंकृतं॥तस्मिंश्चौनकयुरुंवेदज्ञंलोकविश्रुतं॥नत्वातुशाकलाचार्यंतथैवंचाश्वलायनं॥एवंपरंपराप्राप्तंबालबुद्धिमहागुरुं॥यस्यप्रसादाद्व्याख्यामिचरणव्यूहसंज्ञकः॥ ॥अथातश्चरणव्यूहोच्चारव्याख्यास्यामः॥अथशब्दोमंगलेप्रस्तावेच॥अथशब्दःपूर्वमेवमंगलार्थस्त्यर्थः॥अतःहेत्वर्थः।चरणव्यूहः।वेदराशेश्चतुर्विभागात्चरणोच्यते।तस्यव्यूहोसमुदायः।चतुर्वेदानांसमुदायोव्याख्यास्यामस्त्यर्थः।कथमेकवेदः।तदुक्तमारण्यके।सर्वेवेदाःसर्वेघोषाएकैवव्याहृतिःप्राणएवप्राणऋच

BHAU DAJI MEMORIAL

रत्येवंविधादिति। तस्यचतुर्विभागाःकृताः॥तथाचोक्तं।भागवतेदशमस्कंधेषष्ठाध्याये।तेनाचतुर्विभागाःकृताः॥तथाचोक्तं
सोंचतुरोवेदाश्चतुर्भिर्वदनैःप्रभुः॥सव्याहृतिकान्सोंकारांश्चतुर्होत्रविचक्षणः॥पुत्रानध्यापयास्तांस्तुब्रह्मर्षीन्ब्रह्मकोविदान्।
तेतुधर्मोपदेष्टारःस्वपुत्रेभ्यःसमादिशन्॥तेपरंपरयावासास्तन्नछिष्येर्धृतव्रतैः॥चतुर्युगेषुयवस्ताद्वापरादौमहर्षिभिः
॥क्षीणायुःक्षीणसत्त्वांश्चदुर्मेधावीक्ष्यकालतः॥वेदान्ब्रह्मर्षयोव्यस्तान्हृदिस्थाच्युतनोदिनः॥अस्मिन्मन्वंतरेब्रह्मन्स्वर्गत्वा
ह्यृषिभावनः॥ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये॥पराशरात्सत्यवत्यामंशांशकलयाविभुः॥अवतीर्णोमहाभागवेदंचक्रे
चतुर्विधं॥ऋग्यथर्वयजुःसाम्नोराशीरुद्धृत्यवर्गशः॥चतस्रःसंहिताचक्रेसूत्रैर्मणिगणाइव॥मंत्रैर्मणिगणाइवेतिपाठांतरं॥ता
सांसचतुरःशिष्यानुपाहूयमहामतिः॥एकैकसंहिताब्रह्मन्नेकैकस्मैददौविभुः॥पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह॥वै
शंपायनसंज्ञायनिगदाख्यंयजुर्गणं॥साम्नांजैमिनयेप्राहतथाछंदोगसंहितां॥अथर्वांगिरसोनाम्नशिष्यायस्वंतयऋषि
॥पैलस्वसंहितामूचइंद्रप्रमितयेपुनः॥बाष्कलायबह्वृचोप्याहशिष्येभ्यःसंहितांस्वकीं॥चतुर्धाव्यस्यचाध्याययाज्ञवल्क्यायभा
र्गवे॥पाराशरायविदुषेब्रह्मन्नेइंद्रप्रमितिरात्मवान्॥अध्यापयंसंहितांस्वांमांडूकेयमृषिंकविं॥तच्छिष्योदेवमित्रश्चसौभर्यादिभ्य
उचवान्॥इंद्रप्रमितिर्मित्रेयोमांडूकेयः॥मांडूकेयसुतःशाकल्यः॥शाकल्यशिष्योदेवमित्रः।शाकल्यस्तत्सुतः।स्वांतुपंचधाव्य
स्यसंहितां॥वात्स्यमुद्गलशारीरगोखल्यःशिशिरेषधात्॥जातूकर्ण्यश्चतच्छिष्यस्वनिरुक्तांस्वसंहितां॥बालायपैंग्यवेतालवि
रजेभ्योददौमुनिः॥बाष्कलःप्रतिशाखाभ्योबालखिल्योरथ्यसंहितां॥चक्रेबालायनिर्भज्यकाशीरश्चैवतांदधुः॥बह्वृचःसं
हिताएताएतैर्ब्रह्मर्षिभिर्धृताः॥श्रुत्वैवंछंदसांव्यासंसर्वपापैःप्रमुच्यतेऽति॥ ॥अस्यार्थः॥व्यासान्पैलःसंहितांपदक्रमं
चत्रिविधरूपंपठित्वाइंद्रप्रमितयेददौ। इंद्रप्रमितिःचतुर्धाजटांतंव्यासंकृत्वाबाष्कलादिआनिप्रमित्रेतेषट्शिष्येभ्यः-
स्वसुतःमांडूकेयांचददौ॥शाकल्यसंहितापदक्रमजटादंडरूपंचपंचधाव्यासंकृत्वावात्स्यमुद्गलशारीरगोखल्यशिशि

रेभ्यःददौ॥इतिपदेषुसंहितात्वंऽतिकरणवेष्टनंउदात्तस्वरितस्वराणांसंधिः॥एतच्छंदसांव्यासविस्तारंश्रुत्वासर्वपापैःप्रमुच्य
तऽत्यर्थः॥तथाचविष्णुपुराणे॥ब्रह्मणाचोदितोव्यासोवेदान्व्यस्तुप्रचक्रमे॥अथशिष्यात्सजग्राहचतुरोवेदपारगान्॥ऋग्वेद
श्रावकंपैलंसग्राहमहामतिः॥वैशंपायननामानंयजुर्वेदस्यचाग्रहीत्जैमिनीसामवेदस्यतथैवाथर्ववेदवित्॥सुमंतुस्तस्य
शिष्योभूद्वेदव्यासस्यधीमतः॥ ॥तथाचगरुडसूत्रे॥ सुमंतुर्जैमिनिर्वैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या
ऽति।जानंतिबाह्वृचाऽत्यारभ्यमांडूकेयाऽत्यारभ्यमांडूकगणसमुदायः॥गर्गीवाचक्नवीत्यारभ्यशांखायनमित्यंतेनशां-
खायनगणः॥एतेषांकौषीतकीसूत्रेब्राह्मणआरण्यकंच॥ऐतरेयऽत्यारभ्यआश्वलायनोंताः॥आश्वलायनगणाः॥ए
षांऐतरेयआरण्यकब्राह्मणंआश्वलायनसूत्रऽत्यर्थः।तत्रयदुक्तंचातुर्वेद्यंचत्वारोवेदाविज्ञातानिभवंति।अस्मिन्ग्रंथे
यदुक्तंचातुर्वेद्यंतेनचत्वारोवेदाविज्ञाताभवंति॥ऋग्वेदोयजुर्वेदःसामवेदोऽथर्ववेदश्चेति।इतिस्पष्टार्थः॥वेदाहियज्ञार्थम
भिप्रवृत्ताः॥तथाचविष्णुपुराणं॥आद्योवेदश्चतुष्पादःशतसाहस्रसंमितः॥ततोदशगुणःकृत्स्नोयज्ञोयंसर्वकामधुक्-
अत्रांतरेयत्सुतोव्यासःअष्टाविंशतिमेंतरे॥वेदमेकंचतुष्पादंश्चतुर्धाव्यभजत्प्रभुरिति॥अस्यार्थः॥आद्योवेदः वेदवि
भागात्पूर्वकालीनोवेदश्चतुष्पादः ऋगादिचतुष्टयसमूहरूपः॥शतसाहस्रसंमितः। दशदशगुणितंदशशतानितत्स
हस्रंतत्सर्वमित्यादिश्रुतेः।अनंतसंख्याकः।अनंतावैवेदाऽतिश्रुतेः॥ततोवेदात्प्रवृत्तः कृत्स्नोयंदशगुणः।दशविधः
। सएषयज्ञःपंचविधोग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यानिपशुःसोमऽतिश्रुतेः।तथाचपंचवाएतेमहायज्ञाःऽत्युपक्रम्य
ब्रह्मयज्ञोदेवयज्ञःपितृयज्ञोभूतयज्ञोमनुष्ययज्ञश्चेऽतिश्रुतेश्च॥वैतानिकागार्त्यश्चदशयज्ञाः।अत्रांतरेवैवस्वतमन्व
तरेअष्टाविंशतिमेद्वापरेऽतिशेषः।मत्सुतोव्यासःकृष्णद्वैपायनश्चतुर्धाव्यभजत्॥ऋग्वेदादिरूपेणचतुर्धाविभक्त
वान्।पाकयज्ञास्त्रिविधाःअत्रगृह्यंहुताआग्नौहूयमानाअनग्नौप्रहुताब्राह्मणभोजनेब्रह्मणिहुताऽति।।अत्रवृत्ति

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रुत्हुताअग्नौहूयमानाःहविष्यस्यजुहुयादित्येवमाद्योहुताःअनग्नौक्रियमाणाःअथबलिहरणमित्येवमाद्यःप्रहुताः। ब्राह्मणभोजनंयत्रास्तिब्राह्मणान्भोजयित्वेतिब्रह्मणिहुतामितिब्रह्मयज्ञः पारायणंच।अत्रगृह्यसूत्रं। ब्रह्मयज्ञखंडे।यदत्रोर्ध्वंतेपयआहुतिभिरेवतद्देवतास्तर्पयतियद्यजूंषिघृताहुतिभिर्यत्सामानिमध्वाहुतिभिर्यदर्वाग्थैगिरसःसोमाहुतिभिर्यद्ब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपुराणानीत्यमृताहुतिभिर्यदत्रोर्ध्वंतेपयसःकृत्वाअस्यपितृन्स्वधाउपक्षरंतीति॥तत्रऋग्वेदस्याष्टभेदाभवंतीतिस्वानानिभवंतीतिपाठांतरं॥शाकल्यबाष्कलोऽऐतरेयब्राह्मणाआरण्यकौ॥४॥सांख्यायनमांडूकेयकौषीतकीयब्राह्मणारण्यकावित्यष्टभेदाः।अन्यवेदाविकृतिशाखाश्चभेदस्तुत्रिविधस्तथा॥पृथग्नामाभिधानेनन्यासेनकथितंपुरारइतिअत्राष्टभेदेनाष्टौस्थानेनवाविकृतिर्ग्राह्या।विकृतिस्तुअंतेवक्ष्यामः।तस्माद्ब्रह्मयज्ञार्थेपारायणार्थेचऋग्वेदस्याध्ययनंकर्तव्यं॥ततश्चतुष्पदेनवक्ष्यति।चर्चाश्रावकश्चर्चकःश्रवणीयपारइति।चर्चाध्ययनं। तत्रऔणसूत्रे।चिंतिकथिकुंबिचर्चश्च।एभ्योऽङ्स्त्रियामावादौ।चितिस्मृत्यां। पूजिपूजायांकथंवाक्यप्रबंधे।कुंबिआच्छादने। चर्चअध्ययनेचुरादयइतिअष्टाध्यायसूत्रेतात्वोष्टपुटव्यापारेणशास्त्रस्यश्रवणंक्रियतेसाचर्चा। तदध्ययनस्यश्रावकोगुरुः।तस्यचर्चकःशिष्यः।श्रवणीयपारःश्रवणीयोवेदःतस्यपारःसमाप्तिः।इतिचतुष्पदेनअध्ययनंसूचितं।अग्रेचतुष्पदेनचत्वारिपारायणानिसूचयति।तत्पारायणंद्विविधं।प्रकृतिविकृतिरूपं।काप्रकृतिः।काविकृतिः।प्रकृतिःसंहिता। साद्विविधा।रूढायोगरूढा।यथा।अग्निमीळेपुरोहितमिति।योगायथा। अग्निमीळेपुरोहितमितिप्रातिशाख्येद्वितीयपटलेभाष्यकारेणव्याख्यातं।अथचतुष्पारायणंयथा।क्रमपदःक्रमपदःक्रमजटःक्रमदंडश्चेतिचतुष्पारायणंक्रमशास्त्रेउभयसंहितावाच्यः।सकथं अनुलोमविलोमाभ्यांत्रिवारंहिपठेत्क्रमं।विलोमेपदवत्संधिरनुलोमेयथाक्रमं।यथाक्रमंयथासंहिताइत्यर्थः।अन्यच्च। वर्णक्रमःअक्षरसमाम्नायःएवेत्यारण्यके।कथमभिधुया।दित्यक्षरऋचः।चतुरक्षरऋचः।पंक्तयः।अर्धर्चऋचः।ऋक्ऋचः इति

ब्राह्मणं॥भूयांसितुसमाम्नायाव्यंजनमात्रंतुतत्तस्याभिधानस्यभवतीतिनैरुक्ताः।क्रमःसंहितावाचि।कथं।पदप्रकृतिःसंहितारइतिनैरुक्तवचनात्। साक्रमरूपारइत्यर्थः।क्रमपदःक्रमःसंहितातस्याःपदानि।इतिद्वेप्रकृतिपरायणेद्वेविकृतिरूपे। विकृतिअष्टाभवति।तच्च।जटामालाशिखारेखाध्वजोदंडोरथोघनः॥अष्टौविकृतयःप्रोक्ताक्रमपूर्वामहर्षिभिरिति।आसांमध्येजटादंडयोःप्राधान्यं।तत्कथं।जटानुसारिणीशिखा।दंडानुसारिणीमाला।रेखाध्वजोरथश्च। घनस्तुउभयानुसारित्वात्।अस्याःनियमवाक्यानिव्याख्यास्यंतेकृतजटापटले।उदाहरणानिच।तत्रजटावाक्यं।क्रमेयथोक्तेपदजातमेव।द्विरभ्यसेदुत्तरमेवपूर्वं।अभ्यस्यपूर्वंचतथोत्तरेपदेवसानमेवंहिजटाभिधीयते॥अस्यार्थः॥क्रमेयथोक्तेसति।क्रमोद्वाभ्यामित्यायत्नमुक्तेक्रमप्रकारेपदजातंपदद्वयंवापदत्रयंवाद्विरभ्यसेत्।द्विवारंपठेत्।अभ्यासप्रकारः।उत्तरमेवपूर्वं।क्रमवत्पदद्वयंगृहीत्वापूर्वेणमप्रथमंउत्तरपदमभ्यसेत्।ततःउत्तरपूर्वपदयोःसंधानद्वारापूर्वंद्विरभ्यस्योत्तरपदेअवसानं॥एवंप्रकारेणअध्ययनंजटाभिधीयतेकथ्यते।इतिनिश्चयार्थं।उदाहरणंनदृश्यते।अग्निमीळेरीळेग्निमग्निमीळेरीळेपुरोहितंपुरोहितमीळेरीळेपुरोहितंरत्नादिज्ञेयं।अथदंडलक्षणं॥क्रमश्चक्रमविपर्ययश्चपुनश्चक्रममुत्तमं।अर्धर्चादेवमुक्तयोक्तःक्रमदंडोभिधीयते।उदाहरणं।अग्निमीळेरीळेग्निं।अग्निमीळेरीळेपुरोहितं।पुरोहितमीळेग्निमित्यादिज्ञेयं।अथमालालक्षणं॥ब्रूयात्क्रमविपर्यासावर्धर्चस्यादितोततः॥अंतंचादिनयेदेवंक्रममालेतिगीयते।मालामालेवपुष्पाणांपदानांग्रंथिनीहितौ॥आवर्तनेत्रयस्तस्यांक्रमश्चक्रमसंक्रमाः॥अथशिखालक्षणं॥पदोत्तरंजटामेवशिखामार्याःप्रचक्षते॥अथलेखालक्षणं॥क्रमादित्रिचतुःपंचपदक्रममुदाहरेत्।पृथक्पृथक्विपर्यस्यलेखामाहुःपुनःक्रमात्॥अथध्वजलक्षणं॥ब्रूयादादेःक्रमंसम्यक्गंतादुत्तारयेद्यदि॥वर्गेवाक्वचिवायत्रपठनंसध्वजःस्मृतः॥६॥अथरथलक्षणं॥पादस्योर्धर्चस्योवापिसहोक्त्यादंडवद्रथः॥७॥अथघनलक्षणं॥जटामुक्तविपर्यस्यघनमाहुर्मनीषिणः॥८॥अन्यच्च॥जटाशिखाघनःप्रोक्ताक्रमपूर्वा

मर्नाषिभिः॥१॥इतिविखलिखक्षणान्युक्तानिअध्ययने॥संहितापारायणं॥पदपारायणं॥जटापारायणं॥क्रमदंडपारायणंच॥
चतुष्पारायणमित्यर्थः॥एतेषांशाखाःपंचभवंति॥एतेषांवेदपारायणानांपंचशाखाभवंतीत्यर्थः॥ताः काः॥आश्वलायनीसां-
ख्यायनीशाकलाबाष्कलामांडूकाश्चेति॥इतिप्रसिद्धाः॥तेषामध्ययनं॥तेषांआश्वलायनीयादिशाखानांसमानाध्ययनंसू
चयति॥अध्यायाश्चतुःषष्टिः॥अग्नि॥अयंदेवायेत्यादि॥६४॥चतुःषष्टिरध्यायाइत्यर्थः॥मंडलानिद्वौभवतु॥अग्निमीळेकुषुंभ
कइत्यादि॥उपाकर्मणिप्रसिद्धानीत्यर्थः॥वर्गाणांपरिसंख्यातंद्वेसहस्रेषळुत्तरे॥वर्गादिआऋचांताः॥संख्यावालखिल्यैर्विना
तेया॥षळुत्तरसहस्रद्वयवर्गाइत्यर्थः॥सहस्रमेकंसूक्तानांनिर्विशेषंविकल्पितं॥दशासप्तसूपळभ्यंते॥सप्तदशाधिकसहस्रं-
सूक्तानीत्यर्थः॥संख्यातंवैपदक्रमंएकाशीतसहस्रंवाद्विपंचाशत्सहस्रार्धमेतानिचतुर्दशावासिष्ठानामितरेषांपंचाशीतिः॥
एकंलक्षद्विपंचाशत्सहस्रार्धमेतानिचतुर्दशावासिष्ठानामितरेषांपंचाशीतिः॥एकलक्षद्विपंचाशत्सहस्रपंचशतचतुर्दश
वासिष्ठानां॥१५२५१४वासिष्ठगोत्रीयाणांइंद्रोतिभिरेकसप्ततिपदात्मिकोवर्गोनास्ति॥इतरगोत्रीयाणांपंचाशीत्यधिकपदानी
त्यर्थ॥८५॥अथवालखिल्यसंहितापदसंख्याउच्यते॥लक्षैकंतुत्रिपंचाशत्सहस्रंशतमक्षरंपदानिचद्विनवतिःप्रमाणंशाक
लस्यच॥१॥एकलक्षत्रिपंचाशत्सहस्रसप्तशतद्विनवतिश्चाधिकानिपदानीत्यर्थः॥१५३७९२॥पदानिवालखिल्यस्यऽर्क
संख्याशतानिच॥अधिकानितुसप्तैव॥१२०७वर्गाअष्टादशस्मृताः१८॥सप्ताधिकद्वादशशतानिपदानीत्यर्थः१२०७इत्या
श्वलायनानां॥सांख्यायनानांतुवालखिल्यसंहितपदसंख्याउच्यते॥शाकल्यदृष्टेपदलक्षमेकंसार्धंतुवेदैस्त्रिसहस्रयुक्तं॥श
तानिसप्तैवतथाऽधिकानिचत्वारिंशच्चपदानिचर्चा॥शाकल्योमांडव्यगणरुः॥संहितापदानि॥एकलक्षत्रिपंचाशत्स
हस्रसप्तशतचतुस्त्रिंशदधिकानिपदानीत्यर्थः॥१५३७३४॥पदानिवालखिल्यस्यरुद्रसंख्याशतानिच॥षट्पंचाशदधिका
निवर्गाः॥सप्तदशस्तथा॥एकादशशतषट्त्रिंशत्पंचाशदधिकवालखिल्येपदानीत्यर्थः॥११४१७॥अष्टपंचाशत्पदात्मिकस्यऋक्त्रय ३

स्य॥यमृत्विजोऋक्खिलरूपेणपठंति॥ज्योतिष्मंतमृच॥भावः॥ऋक्त्रयस्यतेषामंतेपदाभावत्वात्॥अंतेवर्गसमाप्तोयावन्मात्र
मृचंपठंति॥एवंद्वेसमीचीकृत्यवर्गः॥आश्वलायनानांचतुर्ऋचात्मकोवर्गः॥इत्याश्वलायनशांखायनशाखयोरध्ययनयोर्भेदइ
त्यर्थः॥यस्यमंत्रस्यपदाभावःतस्यरैखिलिकत्वंसिद्धं॥तर्हित्र्यंबकंयजामहेमंत्रस्यपदाभावात्तस्यरैखिलिकत्वंसिद्धं॥नहिडुमानागा
त्॥उपलेखायां॥त्र्यंबकंप्रथमंभद्रंनःप्रजापतेऋतंचेतिपदक्रममिममुमयाग्निगीमूतिउपयाअर्धर्चोनेपदगीतं॥तस्मात्पदका
लेक्रमकालेचपठंति॥क्रमोद्वेपदशब्दितिवचनात्॥अत्राद्वितीयपदंनास्ति॥अर्धर्चोतसमापनात्॥क्रमाभावः॥तस्मात्पदकाले
क्रमकालेपठनंसएवपदक्रमइत्यर्थः॥क्रमकालेतुवेष्टव्यंचतुस्त्रिंशत्सहस्राणि॥षत्वेणत्वेचदीर्घेआकारेसानुमासिके॥त्रि त्वे
चतुःपंचक्रमेअर्धर्चेतिचवेष्टयेत्॥क्रमेणउदाहरणानिज्ञातव्यानि॥सुषुमायातं॥मोषुणः॥वाजेषुसासहिर्भव॥ओउपासेना॥
न्याविध्यदिलीबिरस्य॥अगादारेगुहाहमा॥निरुस्वसारमस्कृतोषसं॥अग्निमीळे॰ऋत्विजमित्यृत्विजमिति॥चतुस्त्रिंशत्सह
स्राणि॥क्रमकालेतुवेष्टनानीत्यर्थः॥द्विरखंडानांसहस्राणांद्वात्रिंशत्षोडशोत्तरा॥षोडशोत्तरद्वात्रिंशत्सहस्राणिद्विरखंडा
नीत्यर्थः॥चत्वारिंशतंसहस्राणिद्वात्रिंशतंचाक्षरसहस्राणि॥चतुर्लक्षद्वात्रिंशत्सहस्राक्षराणीत्यर्थः॥द्वात्रिंशतंचाक्षर
सहस्राणीत्यर्थसमाप्तेःपुनर्वचनमुक्तं॥अथपारायणेऋक्परिमाणउच्यते॥ऋचांदशसहस्राणिऋचांपंचशतानिच॥ऋ
चामशीतिपदंचपारायणंप्रकीर्तितं॥एतत्पारायणंवालखिल्यैर्विनासंख्यातं॥वालखिल्यानिपारायणेनसंति॥एतत्पारा
नउच्यते॥ऋग्वेदांतर्गतवालखिल्यमेकादशसूक्तं११रुद्रसहस्र१०००सप्तदशा१७धिकमित्यत्रऋचांदशसहस्राणीत्येत
त्संख्याव्यतिरिक्तानिवालखिल्यानीतिप्रसिद्धिः॥तत्रयज्ञानुष्ठानेब्राह्मणेसूत्रेचश्रूयते॥वालखिल्याःशंसतिप्राणावैवा
लखिल्याइति॥अग्निप्रवःसुराधसमितिषट्वालखिल्यानांसूक्तानामितिब्राह्मणेआरण्यके॥अथवालखिल्याविद्रेत्त
उक्तंशेऽग्निनेतिसूत्रकारः॥श्रौतस्मार्तसर्वकर्मानुष्ठानेवालखिल्यप्रसिद्धिः॥वेदपारायणेवर्जमित्यर्थः॥शौनकाचार्यव

चनात्॥ यथाग्नेषाध्यायकुंतापाध्यायनिविदाध्यायस्कंपर्णाध्यायश्चेतितद्द्वात्रिंशत्याध्यायइत्यर्थः। वालखिल्यसंहितासर्वानुक्रमणीयमंत्ररूपीऋक्संख्याउच्यते। द्विपंचाशदधिकपंचशतदशसहस्राणीति१०५५२ वालखिल्यव्यतिरिक्तऋक्संख्यातु। द्विसप्तत्यधिकचतुःशतदशसहस्राणीति।१०४७२। एतत्संख्यानित्यद्विपदानैमित्तिकद्विपदासहिताउक्ता। हवनाध्ययनाभ्यासमानासानि। त्यद्विपदा॥आसांसंख्याउपलेखायांतच्चसाधु। रसिक्न्यांसिषक्तुनउरोदेवाविहेषांसिअयावाजंमदिराधआगांस्कण्वेनेतेदेवायरायस्कामःप्रतिनःस्तोमंस्यायुधासःपितुर्नपुत्रःसनोवाजेषुगावोनयूथंपवस्वसोममंदयंनितितिस्त्रःपरिस्रवानोनृभिर्यमानःप्रत्यंचमर्कमनयंछ्चीभिरितिद्विपदैकपद्दोदोविंशतिस्तासांसप्तदशद्विपदाएकपदाःपंचेति। हवनाध्ययनेविपरीतासानैमित्तिकद्विपदा। ताःआहवर्गरूपेण। पश्चाननतायुंदशारयिर्नदशावनेषुदशाश्रीणंदशाऋक्षःशुशुक्वांदशावनेमपूर्वीर्दशाग्नेत्वन्नश्चत्वार्यग्नेभवपट्प्रभुकैतुदशाराजाराष्ट्रानांदशाकईंत्यक्तादशावक्षुरेकोदशाप्रप्रिप्रधन्वदशातंतेसोतारोदशेमानुकंचत्वार्यायाहिषनसाचत्वारीतिनैमित्तिकद्विपदाचत्वारिंशोत्तरशतमिति। हवनेएकैका।अध्ययनेहेद्वे।आसां-अंत्याएका।उर्वरीतासानित्यद्विपदा। उक्तंचपरिभाषायां।विंशिकाद्विपदाविराजस्तदर्धमेकपदाद्विर्द्विपदास्तृचःसमामनंतितास्तृचःअध्ययनेचतुष्पदाःस्तेत्यर्थः।अयुदवंत्याद्विपदैव।सूक्तस्यार्चोःयुजोयानभवंति।तास्वंत्यानित्याद्विपदैव। एवंअध्ययनेद्वावर्धर्चऋगेवप्राधान्यं।त्रीण्यर्धर्चायाःकर्यं॥तत्रापिद्वावृचावेकाऋचाअर्धर्चाएकाकर्तव्या।अध्ययनसंप्रदायबलात्।अअनादेशोअष्टाक्षराःपादाश्चतुष्पदाश्चर्दतिपरिभाषायां।अध्ययनेत्रीण्यर्धर्चऋगेवसांप्रदायोनास्ति।आसांपरिमाणमाह॥अग्निर्होतारंपंचसहिताधौनषळयंजायतपंच। विश्वोविहायास्तिस्रोयंत्वंरथंपंच।प्रतद्वोचेयंषळेंद्रायत्युपनःपंचेमांतेचत्वारिंशनोनचेभिर्वर्जमिंद्रायद्द्वौसप्त। त्वयावयंषळ्वर्मन्हएकाप्रसुन्वेषंषळूतीदेवानांवर्जं। सुषुमायांतंत्रीणिप्रप्रपूषाश्चतुष्कामस्तुश्रौषद्चत्वारिंशाचीभिर्नोवर्जेहषंनिंद्रपंचयेदेवासोवर्जेतवत्यंनर्यमेकासरस्वेससवायमेका। यारुचात्रीण्येतास्त्रीणि ४

त्रीण्यर्धर्चाऋचादवनीयाश्चतुर्नवतिसंख्याइतित्रीण्यर्धर्चऋक्हवने।अध्ययनेअर्धर्चद्वयेनऋगेका।अर्धर्चेनैकैवऋक्हूयेकर्तव्यइत्यर्थः। एकर्चस्यऋक्हूयंविराड्छंदोविनाकथंभवतीत्याशंक्यतत्रोच्यतेविराड्छंदःसर्वछंदसिव्याप्तोवर्तते। उक्तंचारण्यकेचत्वारःपुरुषाइतिबाध्वःशरीरपुरुषश्छंदःपुरुषोवैदपुरुषोमहापुरुषइति।तस्यौष्णिग्लोमानित्रिगायत्रीत्रिष्टुभांसमनुष्टुप्स्नावान्यस्त्रिजगतीपंक्तिर्मज्जाप्राणोबृहतीति। यान्येतानिविराड्चतुर्थान्येवमुहैवैवंविदुषएतद्दःसर्वैश्छंदोभिःप्रतिपन्नंभवतीति।प्राप्तोभवतीत्यर्थः। गायत्रीश्चपंक्तिश्चव्यतिषजतिगायत्रीवैपुरुषःपांक्ताःपशवइतिब्राह्मणं॥अत्रोदाहरणं॥पवस्वसोममंदयन्नितितिस्त्रोनित्याद्विपदागायत्र्यइतिसर्वानुक्रमणी। द्विपाद्वैपुरुषोवीर्यंत्रिष्टुप्। विराड्व्यामनयोर्हविंश्योर्द्विपद्योरयंपुरुषः॥अत्रोदाहरणं॥पवस्वसोममंदयन्नितितिस्त्रोनित्याद्विपदागायत्र्यइतिसर्वानुक्रमणी। द्विपाद्वैपुरुषो॥आगांस्कण्वेवरिमन्।प्रत्यंचमर्कमनयन्।परिस्रवानोगिरि॰।जगतीपादइति। एवंसर्वंव्याप्तोभवतीत्यर्थः।छंदांसिजज्ञिरइतिश्रुतिः।तथाचज्ञातयज्ञाह्मणे।तदाहुःकिंछंदाःकादेवताग्नेःप्रतिष्ठइतिद्विपदाःछंदोविष्णुर्देवताःप्रतिष्ठेति।यथाविष्णुःसर्वव्याप्तःतथाविराड्छंदःइत्यर्थः।विराड्छंदःइत्यर्थः। विराड्छंदस्तुचतुष्पदा।त्रीण्यर्धर्चायापंचपादाऋक्कर्तव्येति।अअत्रकिंप्रमाणंतच्चोच्यते। एकपाद्द्वयोद्विपदोविचक्रमेद्विपदात्रिपादमभ्येतिपश्चात्।चतुष्पादेतिद्विपदामग्निस्वरेसंपश्यन्पंक्तीरुपतिष्ठमानाः॥ एकपदाद्विपदानित्याद्विपात्रिपादमभ्येति। एकीभूताभवंतीत्यर्थः॥अस्योदाहरणं॥अग्निंहोतारंमन्येदसं।यर्उधर्याकृपा।अग्नेअर्धर्चा॥घृतस्यविभ्राष्टिमनुवष्टिशोचिषाद्विपदा। चतुष्पदातु। पश्चाननतायुं॰॥एकार्धर्चात्रिपदाएकार्धर्चाद्विपदा। एकऋक्पंचपंदा।अध्ययने। द्विर्द्विपदास्तृचःसमामनंतिइत्युत्रसमपादग्रहणात्असमानपादाविरुत्थातर्हिपंक्तिश्छंदोपंचपदाभवतितस्यद्वितीयभेदोविराट्तस्मात्संचपादत्वंप्राप्तं।समपादावा।असमपादोविराड्छंदइत्यर्थः।अत्रश्रुतिः।समोचित्थस्तोनसमंविविष्टःसंमातराविन्नसमंदुहातेइत्यनयाऋचापरिहारः। दक्षिणवामहस्तोसमीकृत्याआसमाप्तावित्यर्थः।अथाध्ययनेऋक्संख्योच्यते। षण्णवत्यधिकचतुःशतदशसहस्राणीति१०४९६नाःसहितनैमित्तिकद्विपदाश्चत्वारिंशोत्त

रशतसहितदशसहस्राणीति१०५६८ ऋचांदशसहस्राणीतिवचनस्यसंख्यापूर्णाभवतीत्यर्थः। एकाउर्व×संज्ञानमुशनावद
न्मरुक्तस्यपंचदशर्चैकीकृत्यएवंपारायणेऋक्संख्या१०५८०॥×रितासाभद्रंनोअपिवातयमनइतिपाराधिक्यमनुक्रमणिका
वृत्तांवप्युक्तेः।भद्रंपुछमित्यारण्यके॥अथसंज्ञानसूक्तं॥संज्ञानमुशनावदत्संज्ञानंबरुणोवदत्। संज्ञानमिंद्रश्चाग्निश्चसंज्ञा
नंसवितावदत्। संज्ञानंनरेभ्यःसंज्ञानमरणेभ्यः।संज्ञानमश्विनायुवमिहास्मासुनियच्छतां। यत्कक्षीवांसंबननंपुत्रोअंगि
रसाभवेत्॥तेननोद्यविश्वेवाःसंप्रियांसमजीजनन्॥संवामनांसिजानतांसमाकूतिर्मनाअसि॥असौयोविमनाजनस्संसमावर्त
यामसि।तछंयारोदृणीमहे०१॥नैर्ऋत्यंसनादरणंपरिवर्तुर्मयध्वि:।तेनाअमित्राणांबाहून्विषाणोषयामसि।परिवर्त्मान्ये-
षामिंद्रःपूषाचसस्तुनः॥तेषांवोअग्निर्दग्धानामभिमूर्द्धानामिंद्रोहंतुवरंवरं॥एषुनत्यदृषोजिनंहरिणस्यधियंयथा॥परांअमि
षांएषत्वर्चाचीगौरुपेजतु॥२॥आध्वराणांपतेवसोहोतर्वरेण्यक्रतो॥तुभ्यंगायत्रमृच्यतेगोकामोअन्नकामःप्रजाकामउतक
श्रयपः॥भूतंभविष्यत्स्तोतिमहंब्रह्मैकमक्षरं॥बहुब्रह्मैकमक्षरं॥यदक्षरंभूतकृतोविश्वेदेवाउपासते॥महर्षिमस्यगोत्तारंज
मदग्निमकुर्वत॥जमदग्निराप्यायतेछंदोभिश्चतुरुत्तमैः॥राज्ञःसोमस्यभक्षेणब्रह्मणावीर्यावता॥द्विवानःप्रदिशोदिशःस-
त्यानःप्रदिशोदिशः॥३॥अजोयत्तेजोदद्दशेशुक्रंज्योतिःपुरोयुहा॥सदक्षिःकश्रयपःस्तोतिसत्यंब्रह्मचराचरं॥ध्रुवंब्रह्मचरा
चरं॥त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषमगस्त्यस्यत्र्यायुषं॥यद्देवानांत्र्यायुषंतन्मेअस्तुत्र्यायुषं॥तछंयोरावृणीमहे॥०४॥
इतिसंज्ञानसूक्तंपंचदशर्चात्मकं॥अस्यग्रहणेप्रमाणमाश्वलायनसूत्रं॥तच्चसमानीवइत्येकातछंयोरावृणीमहइत्येके
ति।तथाचशांखायनस्यकौषीतकिसूत्रं॥तच्च॥अथोपाकर्मौषधीनांप्रादुर्भावेहस्तेनश्रवणेनवाअक्षतसक्तूनांधानानां
चदधिघृतमिश्राणांप्रत्यृचंवेदेनजुहुयादितिहैकआहुःसूक्तानुवाकाद्याभिरितिवाःध्यायार्षेयाद्याभिरितिमांडूकेयोऽथह
स्माकौषीतकिरग्निमीळेपुरोहितमित्येकाकुर्षुंभकस्तदब्रवीदावदंस्त्वंशकुनेभद्रमावदतोवनानाजमदग्निनाधामतेविश्वंभ
वनमधिश्रितंगंतानोयज्ञंयज्ञियाःसन्नामियोनःस्योअरणःप्रतिचक्ष्वविचक्ष्वाग्नेयादिमरुत्सरवायत्तेराजंछृतंहविरितिहृचा ५

सूछंयोरावृणीमहइत्येकाहुनशोषाथविषःप्राश्नंतीतिपंचशारवानांपारायणेतछंयोरावृणीमहइत्यत्रसमाप्तिरेकवेदत्वात्।उ
क्तंच।सांख्याश्वलायनौचैवमांडूकोबाष्कलस्तथा॥बाह्वृचोऋषयःसर्वेपंचैतेत्येकवादिनइति।सांखानामशांखायनइति॥अ
थपारायणेवर्गसंख्याउच्यते॥एकर्चएकवर्ग१जातवेदसइत्यर्थः।नवर्चएकवर्गः१आपोहिष्ठेति। द्वौवर्गौतुबह्वृचोज्ञेयौ।द्वौवर्गौ
ह्वृचा।वित्यर्थः।अग्नेत्वंनोअंतमः।आयाहिवनसासहेति।ऋक्त्रयस्यज्ञातंस्मृतं॥तृचोवर्गः।ज्ञातमित्यर्थः।उदुत्यंचसमंनव-
मित्यादि।चतुर्ऋचपंचसप्तत्यधिकंचज्ञातंतथा॥चतुर्ऋचवर्गःपंचसप्तत्यधिकज्ञातंइत्यर्थः॥१७५।यदंगदाशुषेत्वमित्यादि॥
पंचर्चोतुदिज्ञातकंसहस्रंरुद्रसंयुतंपंचर्चवर्गः एकादशाधिकद्वादशातानीत्यर्थः।१२११।अग्निमीळइत्यादि।पंचचत्वार्य
धिकंतुषष्ठचांतुज्ञातत्रयं॥षष्ठचवर्गः पंचचत्वारिंशत्यधिकत्रिज्ञातत्रयइत्यर्थः॥३४५।अग्निनायज्ञरीरिषइत्यादि।सप्तऋचां
ज्ञातंज्ञेयंविंशतिश्चाधिकास्मृता॥सप्तर्चवर्गः विंशत्यधिकत्रिज्ञातइत्यर्थः॥१२०।यच्चित्सिसत्यसोमपाइत्यादि॥अष्टऋचांतुपंचा
शत्पंचाधिकास्तथैवच॥अष्टर्चवर्गः पंचाधिकपंचशतइत्यर्थः॥५५।इंद्रंविश्वाअवीवृधन्नित्यादि॥दशाधिकंसहस्रं।एवं दि
दशाधिकसहस्रद्वयवर्गइत्यर्थः॥२०१०।पंचशारवास्तुनिश्चिताः॥पंचशारवानांपारायणेनिश्चयेनइत्यर्थः। वर्गः संज्ञानसूक्तस्य
चत्वारश्चात्रमिलिताः॥संज्ञानसूक्तस्यचत्वारोवर्गाश्चअत्रमिलितादशाधिकसहस्रद्वयमित्यर्थः॥एवंपारायणेप्रोक्ताऋचांसंख्येन
न्यूनतः॥एवंपूर्वोक्तप्रकारेणवर्गस्यऋक्न्यूनसंख्येनदशार्चस्यपंचऋक्कर्तव्यइत्यर्थः॥एवंचतुर्विधपारायणेपिज्ञेयं॥समाप
नीवइतिशाकलानांतछंरितिबाष्कलानामित्यत्रबाष्कलशारवाध्ययनमनुक्रमणिकावृत्तावुक्तं।तच्च।गौतमोरौहिजःकुत्सःपारु
छेपादृषेःपरः॥कुत्सादीर्घतमेत्येवंबाष्कलाध्ययनेक्रमः॥अस्यार्थः।गौतमोरौहिजःकुत्सः।उपप्रयंतो।नासत्याभ्यां।अग्निंहोता
रं।इमंस्तोमं।वेदिषदे।एषबाष्कलक्रमइत्यर्थः।अत्रैवमुक्तेउत्तममंडलेनवकेअनुक्रमविपर्यासः।तच्च।स्वादोरभक्षिसूक्तांतेअ
ग्निप्रवःसुराधसंप्रसुश्रुतमितिसूक्तद्वयंपठित्वा।अग्नआयाह्यग्निभिरितिपठेत्।ततःआप्रद्रवाध्यायेगोधयेत्यनुवाकोदशा-

सूक्तात्मकोशाकलस्यापंचदशसूक्तात्मकोबाष्कलस्य। तत्रोच्यते। गौर्धयतिसूक्तानंतरंयथामनौसांवरणो। यथामनौविवस्वति। उपमंत्रा। एतत्तरंद्रा भूरीदिंद्रस्य। इत्यंतानिपंसूक्तानिपठित्वाआत्वागिरोरथीरिवेतिपठेयुः। अंतेसंसमित्सूक्तानंतरंपंचदशर्चात्मकंसंज्ञानमुशोनावदत्तळंयोरावणीमहदित्यंतंवेदसमाप्तिरितिबाष्कलशाखाध्ययनं। एवमध्ययनाभावात्शाखाभावइत्यर्थः। सूक्तसहस्रसमदशाधिकात्। अष्टोसूक्तानिबाष्कलस्याधिकानीत्यर्थः। प्रतिते। युवंदेवा॥ यमृत्विजः। इमानिवामिति चत्वारिवालखिल्यसूक्तानांलोपइत्यर्थः॥ यस्यानृपिर्हदंदेवाप्यधीतेसनाकपृष्ठंभजतेहविष्मत्। अस्यार्थः। यःतान्ऋगर्थवित्वेदततः हवनपारायणंचअधीतेसःवेदिताध्येताचनाकपृष्ठंस्वःस्वत्सदाभजते। हविसिध्यै। इतोमुंलोकमेत्युततस्मान्नप्रच्यवतेहीत्यर्थः॥ ॥अथपारायणफलंतदुक्तमारण्यके। यत्रिसंधिंविवर्तंतितंनिर्भुजस्यरूपंमथयत्युत्थेअक्षरेअग्नियाहरतितत्प्रतृण्णस्याग्रउपावोभयमंतरेणोभयच्यासंभवत्नायकामोनिर्भुजंब्रूयात्स्वर्गकामःप्रतृण्णमुभयकामउभयमंतरेणेति। अस्यार्थः। हयोःपदयोरक्षरयोर्वापिसंधिस्तस्यअविच्छेदाध्ययनंतन्निर्भुजं। संहितापारायणमुच्यते। शुक्थेहैपदेअक्षरेवासंधिमकुर्वतोच्चारणंतत्प्रतृण्णंपदपारायणं। संहितापदाभ्यांउभाभ्यांव्याप्तमंतरेणक्रमपारायणमित्यर्थः। तथाचसप्तिभिःकृत्वास्वरास्वरंविजा। नातिमात्रामात्रांविभजंतेसासंहितेति। एवमेतांसंहितांयोवेदसंधीयतेप्रजयापशुभिर्यशसाब्रह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरेतीति। तस्मात्क्रमादतेहैपदेसंहितांहैपदस्वरश्चनसिध्यति। हैपदेसिध्येःउत्तरारंभःकर्तुंनशक्यते। अतश्चपादार्धंचऋक्सूक्तसिध्यर्थंभगवतापंचालेरुछापितानांपारायणक्रमणांक्रमपारायणमुत्तमंभवतीतिचात्रश्लोकः॥ प्रगायेनपुरादानंदृष्ट्वाकुत्सोमहामुनिः। अर्थवत्तंक्रमंब्रूयाद्देवतायाश्चशास्त्रतः अतोदृग्यजुषांबृंहणंपदैःस्वरैःश्चाध्ययनंतथात्रिभिः। अस्यार्थः। अतोपिअस्मादपिहेतोर्ऋक्रमःअर्थवान्भवति। क्रमेणहृत्वाऋग्वेदपारायणेऋचांबृंहणंसाधारणं। इदमित्थमेवपाठइतिनिश्चयोभवतिइत्यतिशयेदृश्यत्वंप्रपंचेन॥ अथपारायणविधिः॥ अत्रादौकलशस्थापनायुक्तंमहार्णवे॥ तीर्थंदेवालयेगेहेप्रशस्तेषुपरिस्थते॥ कलशंसुदृढंन ६

२ स्वरमात्रादिरूपेणनिश्चयोभवति॥ तथायजुर्वेदपारायणयजुषांबृंहणंनासेसाधारणंस्वरमात्रादिरूपेणइदमित्थमेवपाठइति

CBHAU DAJI MEMORIAL

त्रसूनिर्णिक्तंसुभूषितं॥ पुष्पपल्लवमालाभिःचंदनैःकुंकुमादिभिः॥ मृत्तिकात्रयसंमिश्रंवेदिमध्येन्यसेत्ततः॥ पंचाद्रिःकुशैःकार्योब्रह्मापश्चान्मुखस्थितः॥ स्नापितःस्नापितःकुंभेचतुर्वाहुश्चतुर्मुखः॥ वत्सजाचाकृतिंवेदमुत्तराग्रैःकुशैःकृतं॥ ब्रह्मोपधानेदत्वातंततःस्नस्त्ययनंपठेत्॥ प्रतिष्ठांकारयेत्पश्चात्पूजाद्रव्योमयोच्यते॥ यज्ञोपवीतंनैवेद्यंवस्त्रंचंदनकुंकुमैः॥ स्नक्धूपदीपतांबूलैरर्पितैस्तुपितामहं॥ ब्रह्मजज्ञानमितिवाग्गायत्र्यावात्रपूजयेत्॥ उपाध्यायंचसंपूज्येयथाशक्तंपठेत्ततः॥ ततोहोमादिवस्त्यमाणेविधिनाकृत्वापठेदित्यर्थः। तत्रैवबौधायनः॥ रुंडिलंकल्पयित्वाग्निमुपसमाधायसंपरिस्तीर्याज्येनैताभ्योदेवताभ्योजुहोत्यग्नयेसोमायविश्वेभ्योदेवेभ्योब्रह्मणेऋषिभ्योऋग्भ्योयजुर्भ्यःसामभ्यःश्रद्धायैप्रज्ञायैमेधायैधारणायैश्रियैह्रियैसावित्र्यैसवित्रेप्रजापतयेकांडऋषयेअग्नयेकांडर्षयेऋषयेविश्वेभ्योदेवेभ्यःकांडऋषिभ्यःसांहितीभ्योदेवताभ्यउपनिषद्भ्योयाज्ञिकीभ्योदेवताभ्यउपनिषद्भ्योह्यवाहायविश्वेभ्योवरुणीभ्योःनुमत्यैसिष्टकृतेचपृथक्स्वाहाकारेणहुत्वाव्याहृतिभिश्चपुनःपरिषिंचतिसमाप्तेचैतायजुषातर्पयतिरावमृग्वेदस्यकांडऋषयादिवर्जमास्विष्टकृतस्तेषांरुछानेज्ञातृभ्योमाध्यमेभ्योगृत्समदायविश्वामित्रायवामदेवायात्रयेभरद्वाजायजामदग्न्यायगोतमायवसिष्ठायप्रगाथेभ्यःपावमानीभ्यःक्षुद्रसूक्तेभ्योमहासूक्तेभ्योमहानाम्नीभ्यइतितोवेदादिमारभ्यसंततमधीयीतेत्याहभगवान्बौधायनः। पुनर्महार्णवः॥ ॥अथातःपारायणविधिंव्याख्यास्यामः आसमाप्तेर्नाश्नीयाद्यथाशक्तिंवापःपयःफलान्योदनंवाहविष्यमात्रमश्नीयात्कदाशेषमधीयीतग्रामात्प्राच्यामुदीच्यांवादिक्षुपनिष्क्रम्याग्निमुपसमाधायपरिस्तीर्येध्मंप्रज्वाल्याज्येनैताभ्योदेवताभ्योजुहोत्यग्नयेसोमायेंद्रायप्रजापतयेबृहस्पतयेविश्वेभ्योदेवेभ्योब्रह्मणेऋषिऋग्भ्योयजुर्भ्यःसामभ्योश्रद्धायैमेधायैप्रज्ञायैधारणायैसदसस्पतयेःनुमतयेश्रियैह्रियैसावित्र्यैसवित्रेप्रजापतयेकांडऋषयेसोमायकांडऋषयेअग्नयेकांडऋषयेविश्वेभ्योदेवेभ्यःकांडऋषिभ्यःसांहितीभ्योदेवताभ्योपनिषद्भ्योयाज्ञिकीभ्योदेवताभ्योपनिषद्भ्योवारुणीभ्योदेवताभ्यउपनिषद्भ्योह्यवाहायविश्वेभ्योवरुणीभ्योःनुमत्यैसिष्टकृतेचपृथक्स्वाहाकारेणहुत्वाव्याहृतिभिश्चपुनःपरिषिंचतिसमाप्तेचै

वयजुषातर्पयतीति।अंतेएतान्हिसोमायाःयजुषापदेनसहतर्पयेत्।यद्वाभूर्देवांस्तर्पयामीत्यादियजुषातर्पयित्वाग्न्यादींस्तर्पयेदित्य
र्थः॥ महार्णवः॥एवंऋग्वेदानांकोंडऋग्यादिवर्जमास्थितस्तेषांस्तानेवार्तान्विभ्यस्त्यादिमहानाम्नीभ्यस्त्यंतंब्राह्मत्॥ततोवेदादि
मारभ्यसंततमधीयीतनेतस्यांतरानध्यायेनास्यांतराजननमरणेअशुचिरशौचिनेत्यर्थः॥नंतराव्याहरेन्नविरामेणावदेतमधीयीत
यावत्यर्थेतंपवेत्तावत्यर्थेतंनविरमेन्नान्यच्चवेदेदित्यर्थः।यदंतराविरमेत्त्रीन्प्राणानायम्यप्रणवंवाव्याहृतिंविधाययावत्कालमधीयीतसर्वंनि
शोनिशांतरंसंध्यामात्संध्यारण्यसन्निधंलोप्यपरिदध्यात्॥निशांतरंसंध्या।निशादीन्लोप्यविरम्यसमापयेदित्यर्थः।आदावंतेचब्रा
ह्मणभोजनंदक्षिणांदद्यादितिमहार्णवोक्तं॥ ॥अथकर्मलाकरः॥यएतेनविधिनावेदमधीयीतसततंपूतोवेदोभवतिमनःशुध्यिंच
भवति।वेदरूपोभवतीत्यर्थः।द्वाभ्यांपारायणाभ्यांऋग्भिश्चाभोजनरहाधीतेःनृतेभ्यःप्रमुच्यतेविप्रिर्वहुभ्यःपतनीयपातकेभ्यःभ्रूद्व
यांरेतःसित्कागंगाप्लुमन्निमज्यश्चभवतिचतुर्भिःभ्रूद्रान्नभोजनात्स्त्रीसेवनाच्च।पंचभिरयाज्ययाजनादग्राह्यग्रहणात्।षड्भिर्ब्रह्म
णस्तेयाद्धितकरणात्पशुहननात्सुवर्णस्तेयात्सतितसंयोगाच्चसप्तभिःप्राजापत्यस्यहीनचरणाद्यज्ञोपवंधनाच्चाष्टभिश्चांद्रायणगुरु
तल्पगमनाद्रजस्वलागमनाच्चनवभिःक्रूराणनात्।दशभिःपुनर्जन्मेहजन्मकृतैःसर्वैःपापैःप्रमुच्यतेस्वर्गलोकंगछतीतिपित
स्वर्गलोकंगमयतीतिअग्निष्टोमादिभिःक्रतुभिरिष्टंभवतिवेदाध्यायीसदेवस्यात्पापात्सत्यवाक्शुचिः।यंयंकामयतेकामंतंतंवे
देनसाधयेत्।असाध्यंनास्तियल्किंचिद्ब्रह्मणोहिफलंमहत्॥ऋग्विधाने॥आदावेवतुसावित्र्याकर्मकुर्वीतशांतये॥पुष्टयेपशु
लाभायधनलाभायभूतये॥एषाहिसंहितादेवेसर्वत्रब्रह्ममयीनिचत्।अग्नेणतपसादृष्टाविश्वामित्रेणधीमता॥होमांश्चजपय
ज्ञांश्चनित्यंकुर्वीतवेदतथा॥सर्वकामप्रसिध्यर्थंपरंब्रह्मेदमुच्यते॥एषावैप्रतिलोमोक्तापक्षःशत्रुविनाशनी॥अक्षरप्रतिलोमोय
मग्निचारेषुदास्यते॥सर्वमंहितयाप्रत्यृचंहोमआज्येनतिलेनवा॥आज्यंद्रव्यमनादेशाज्जुहोतिषुविधीयतइतिब्राह्मोक्तेःसर्वपाप
हरोऽहोमस्तिलैःसर्वत्रशस्यतइतिविष्णुधर्मोत्तरात्॥शांतापनः।कृछ्रोदैन्ययुतंचैववेदपारायणंतथा॥तिलंहोमसहस्रंचसम ७

मेतच्चतुष्टयं॥इदंकेवलं॥अंत्येचांद्रमसं॥इतिकमलाकरभट्टकृतोक्तवेदपारायणविधिःसमाप्तः॥ ॥इतिचरणव्यूहेप्रथमखंडंव्या
ख्यासमाप्तं॥१॥व्याख्याचरणव्यूहस्यआद्यंखंडमस्तेनवै॥यथामतिविरचितासूक्ष्मदेवप्रसादतः॥ ॥यजुर्वेदस्यषडशीतिर्भेदावंतितत्रचरकानामस्यद्वादशभेदाभवंतिचरकाआदूरकाःकठाःप्राच्यकठाःकपिष्ठलकठाःचारायणीयावारायणीयावार्तांतवे
याःश्वेताःश्वेततराऔपमन्यवःपाराशर्यावैधेयावैनेयाओघेयागालवावैजवाःकात्यायनीयाश्चेति।तत्रमैत्रायणीयानामसप्तभेदाभवंतिमानवाडुंडुभाश्चैकेयावारा
हाहारिद्रवेयाश्यामाश्यामायणीयाश्चेतितेषामध्ययनमष्टौद्वातंयजुःसहस्राण्यधीत्यद्वारखापारोभवतितान्येवद्वियुणान्यधीत्यप
दपारोभवतितान्येवत्रियुणान्यधीत्यक्रमपारोभवतिषडंगान्यधीत्यक्रमपारोभवतिषडंगान्यधीत्यषडंगविद्भवतिशिक्षाकल्पोव्या
करणंनिरुक्तंछंदोज्योतिषमित्यंगानितत्रप्राच्यामुदीच्यांनैर्ऋत्यांनैर्ऋत्यास्तत्रवाजसनेयानामसप्तदशभेदाभवंतिजाबालाब
ुध्येयाःकाण्वामाध्यंदिनाःशापीयाऔरुछापायनीयाःकापालाःपौंड्रवत्साआवटिकाःपरमावटिकाःपाराशर्यावैधेयाःवैनेयाओघे
यागालवावैजवाःकात्यायनीयाश्चेतित्रतिपदमनुपदंछंदोभाषाधर्मोमीमांसान्यायस्तर्कइत्युपांगानिभवंत्युपज्योतिषंसांगत्व
क्षणंप्रतिज्ञानुवाक्यःपरिसंख्याचरणव्यूहःश्राद्धकल्पःप्रवराध्यायश्चशास्त्रक्रतुसंख्यानुगमयज्ञपार्श्वानिहोत्रकंपशवोक्थानि
कूर्मलक्षणमित्यष्टादशपरिशिष्टानिभवंतिहेसहस्रेशतेन्यूनेमंत्रेवाजसनेयिके। इत्युक्तंपरिसंख्यातंमेतत्सकलंसशुक्लि
यं॥ग्रंथाश्चपरिसंख्याताब्राह्मणंचचतुर्गुणं॥तैत्रतैत्तिरीयकानामहिभेदाभवंतित्योरव्याकांडीकेयाश्चेतितत्रकांडिकेयानाम
पंचभेदाभवंत्यापस्तंबीबोधायनीसत्याषाढीहिरण्यकेशीऔधेयीश्चेतितत्रकठानांतूपगायतुविशेषचतुश्चत्वारिंशत्युपग्रंथा
निमंत्रब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यते।यजुर्वेदस्यविज्ञेयोन्येशाखांतरास्मृतास्तेषामध्यनंप्रवचनीयाश्चेति॥२॥यजुर्वेद
स्यषडशीतिर्भेदाभवंति॥अत्रशाखाभेदोग्राह्यः॥षट्अशीतिर्भेदाइत्यर्थः॥तत्रचरकानामहादशभेदाभवंति।इतिस्पष्टा
र्थः॥तेकेभेदाःचरकाः।आदूरकाः।कठाःप्राच्यकठाःकपिष्ठलकठाः॥आरायणीयाः।वारायणीयाः।वार्तांतरेयाः।श्वेताः।श्वे

ततराः औपमन्यवः।मैत्रायणीयाश्चेति।इतिमैत्रावरुणीयाश्चारखागणाइत्यर्थः।मैत्रायणीयस्तुवाजसनीयवेदाध्यायीमानवकर्म
सूत्रं।तेषामध्ययनमष्टोत्तरशतंयजुःसहस्राण्यधीत्यशारखापारोभवति।तेषामध्ययनेद्विचत्वारिंशद्ध्यायाः।अष्टशताधिकसह
स्रमंत्राइत्यर्थः।तान्येवद्विगुणान्यधीत्यक्रमपारोभवति।द्विवारपठनात्पदपारायणफलंभवतीत्यर्थः।तान्येवत्रिगुणान्यधीत्यक्रमपारोभवति
।त्रिवारपठनात्क्रमपारायणफलंभवतीत्यर्थः।पदक्रमाध्ययनंभवतीत्यर्थः।तत्रप्राच्यांउदीच्यांनैर्ऋत्यांनैर्ऋत्यास्तत्रवाजसनेया
नांपंचदशभेदाभवंति।प्राच्योदीच्यनैर्ऋत्यस्तिस्रोदिशायावाजसनीयवेदोत्पत्तिः।अग्रेवक्ष्यामः।इतरदेशेषुवेदशारखयोर्विभागउ
च्यते।तच्चमहार्णवे॥पृथिव्यामध्यरेखाचनर्मदापरिकीर्तिता॥दक्षिणोत्तरयोर्भागेशारखाभेदाश्चउच्यते॥नर्मदादक्षिणेभागे-
आपस्तंब्याश्चखायनी॥पारायणीपिप्पलाचयज्ञकन्याविभागिनः॥माध्यंदिनीशारखायनीकौथुमीशौनकीतथा॥नर्मदोत्तरभागे
चयज्ञकन्याविभागिनः॥तुंगारुष्मातथागोदासह्याद्रिश्चिरखरावधि॥आआंध्रदेशपर्यंतंबह्वृचश्चाश्वखायनी॥उत्तरेगुर्जरे
देशेवेदोबह्वृचकीर्तितः॥कौथीतकीब्राह्मणंचशारखाशारखायनीतथा॥आंध्रादिदक्षिणाग्नेयीगोदासागरआवधि॥यजुर्वेद
स्तुतैत्तिर्योआपस्तंबीप्रतिष्ठिता॥सह्याद्रिपर्वतारंभादिशांनैर्ऋत्यसागरात्॥हिरण्यकेशीशारखाचपर्शुरामस्यसंनिधौ॥म
यूरपर्वताच्चैवयावद्गुर्जरदेशतः।व्यासावायव्यदेशात्तुमैत्रायणीप्रतिष्ठिता॥अंगवंगकलिंगश्चकानीनोगुर्जरस्तथा॥वा
जसनीयशारखाचमाध्यंदिनीप्रतिष्ठिता॥ऋषिणायाज्ञवल्क्येनसर्वदेशेषुविस्तृता॥वाजसनीयवेदस्यप्रथमाकाण्वसंज्ञि
केति॥व्यासशिष्योवैशंपायननिरदारयद्यजुर्वेदंपठित्वाशिष्यान्चकार॥तच्चभागवते॥वैशंपायनशिष्यावैचरकाध्वर्यवो
भवत्॥यच्चेरुर्ब्रह्महत्याहरूपणंस्वगुरोर्व्रतं॥याज्ञवल्क्यश्चतच्छिष्योअब्रह्मोभगवान्किंयत्॥चरितेनात्यसाराणांचरि
ष्येहंसुदुश्चरं॥इत्युक्तोगुरुरत्याहकुपितोयात्फलंत्वया॥विप्राकमंत्राशिष्येणअधीतंतुत्यजात्विति॥देवरातसुतःसोपि
विदित्वायजुषांगणं॥ततोगत्वौतौमुनयोददृशुस्तान्यजुर्गणान्॥यजुषीतैत्तिरीभूत्वातंलोलुपतयाविदुः॥तैत्तिरी

याइतियजुःशारखाआसन्सुपेशलाः॥याज्ञवल्क्यस्ततोब्रह्मन्छंदांस्यधिगवेषयन्॥गुरोरविद्यमानानितपस्तस्थेर्कमीश्वरं
॥याज्ञवल्क्यउवाच॥ॐनमोभगवतेत्यादि॥जीर्णेभुक्तेउछिष्टंवांतेयातयामयशाद्इतिनिघंटुः॥एवमेवार्थः॥यातयामयजुः
॥कासउपसरामित्यंतंदुष्टाच॥एवमुक्तःसभगवान्वाजीरूपधरोहरिः॥यजूंष्ययातयामानिमुनयेदात्प्रसादतः॥यजुर्भिरकरो
च्छारखाद्दशपंचाशतैर्विभुः॥जग्राहुर्वाजसन्यस्माकाण्वमाध्यंदिनादयः॥इत्यादिपर्यालोचनयायजुर्वेदस्यागानंतरंदेवज्ञानस्तु
तेनअब्राह्मणत्वमियासवितासूर्योवाजीरूपेणवाजेभ्यःकेसरेभ्यःवाजेनवेगेनगासन्यस्मात्स्यक्ताः॥शारखावाजसनेयीसंज्ञा-
शारखारंडत्वपरिहारार्थंचातुर्वेद्यत्वसंरक्षणार्थंचवाजीरूपेणसूर्येणयातयामानियजूंषिमुनयेदत्तानितैर्यजुर्भिरुप
रितेःसमुनिस्तावाजसंज्ञःपंचदशशारखाअकरोत्॥तस्माच्चमुनेःकाण्वमाध्यंदिनादयः॥अध्ययनंचक्रुः॥तेपंचदशाभवंति।

अथप्रसंगायजुर्वेदस्यशारखाप्रणयनविचारःकिंचिदुच्यते॥तत्रयजुर्वेदएवप्रथमः॥तथाचविष्णुपुराणे॥एकएवयजुर्वेदःय-
ज्ञोपयोगित्वरूपयोगात्सर्वोपिवेदोयजुर्वेदइत्युच्यते॥यजुर्वेदस्यशारखाभेदंसविस्तरमाह॥यजुर्वेदतरोःशारखाःसप्तविंशा
न्महामतिः॥वैशंपायननामासौव्यासशिष्यश्चकारवै॥शिष्येभ्यःप्रददौताश्चजगृहुस्तेप्यनुक्रमात्॥याज्ञवल्क्यस्यतस्याभूद्ब्र-
ह्मराजःसतोद्विजः॥शिष्यःपरमधर्मज्ञोगुरुवृत्तिरतःसदा॥ऋषिर्यच्चमहासारोसामाजेथागमिष्यति॥तस्यवेसप्तरात्रंतुब्रह्म
हत्याभविष्यति॥पूर्वमेनंमुनिगणैःसमयोयंकृतोद्विज॥वैशंपायनएकस्तंत्यक्तिकोतवांस्तथा॥सत्स्त्रियंबालकंसोथपद्भ्यु-
ष्टमघातयत्॥शिष्यानाहचभोशिष्याब्रह्महत्यापरावृते॥वरध्वंमत्कृतेसर्वेनविचार्यमिदंतथा॥अथाहयाज्ञवल्क्यस्तंकिमेतैर्ब
हुभिर्द्विजैः॥केशिनेतरत्यतेजोभिश्चरिष्येहमिदंव्रतं॥ततःक्रुद्धोगुरुःप्राहयाज्ञवल्क्यंमहामुनिं॥मुच्यतांयत्त्वयाधीतंमत्तोवि
प्रावमानकः॥निस्तेजसावदस्वेतान्यस्त्वंब्राह्मणपुंगवान्॥तेनशिष्येणनार्थोस्तिममाज्ञाभंगकारिणा॥याज्ञवल्क्यस्ततःप्राह
भक्त्यैतत्तेनयोदितं॥ममाप्यालंत्वयाधीतंयन्मयातदिदंद्विज॥श्रीपराशरउवाच॥इत्युक्त्वारुधिरोक्तानिस्वपाणिचयजूंष्यथ॥छ

र्दयित्वादर्दोतस्मैययौचस्वेछयामुनिः॥यजूंष्यथविसृष्टानियाज्ञवल्क्येनवैद्विजाः॥जग्रहुस्तित्तिरोभूत्वातैत्तिर्यास्तुततःस्मृताः॥ब्रह्महत्याव्रतंचीर्णंगुरूणानोदितंतुयैः॥चरकाध्वर्यवस्तेतुवर्णान्मुनिसत्तम॥याज्ञवल्क्योपिमैत्रेणप्राणायामपरायणाः॥तुष्टावप्रणतंसूर्ययजूंष्यभिलषत्तमः॥अस्यार्थः॥यजुर्वेदोत्तरोरित्यादिनासप्तविंशतिः॥इयंचप्रधानशाखानांसंख्या॥ब्राह्माणीपुराणोक्तयडङ्गीतिशाखाभेदस्तुप्रतिशाखाविवक्षयाताभ्यश्चुक्लयजुःपंचदशकंसहेत्येकशाखाआपस्तंबोक्ताइतिद्रष्टव्यं॥याज्ञवल्क्येनछर्दितैर्यजुर्भिस्तैत्तिरीयशाखाभूत्॥तेयाज्ञवल्क्यव्यतिरिक्तावैशंपायनस्यशिष्याः॥याज्ञवल्क्यविशिष्टानियजूंषिजगृहुः॥ततस्ताःशाखास्तैत्तिरीयाभूरित्यर्थः॥याज्ञवल्क्यव्यतिरिक्तानांचरकाध्वर्युसंज्ञानिर्वक्ति॥चरकाध्वर्यवस्तेवैवरणान्मुनिसत्तमेति॥वराध्वर्यवमितिपाठेवरणंयजुषांग्रहणात्॥आध्वर्यवंचक्रुरित्यर्थः॥यजूंषिवैशंपायनेनाधीतानि॥याज्ञवल्क्यस्ततोब्रह्मन्छंदांस्यधिगवेषयन्॥गुरोरविषमानानिसूपतस्थेर्कमीश्वरमितिभागवतोक्तेः॥ ॥याज्ञवल्क्यउवाच॥नमःसवित्रेहारायमुक्तेरमिततेजसे॥ऋग्यजुःसामरूपायत्रयीधामात्मनेनमः॥इत्येवमादिभिस्तेनस्तूयमानःसवैरविः॥वाजीरूपधरःप्राहव्रजनामभिवांछितं॥याज्ञवल्क्यस्तथाप्राहप्रणिपत्यदिवाकरं॥यजूंषितानिमेदेहियानिसंतिनमेगुरुः॥परावारउवाच॥एवमुक्तोददौतस्मैयजूंषिभगवान्रविः॥अयातयामसंज्ञानियानिनवेत्तिततुरुः॥यजूंषियैरधीतानितानिविप्रेहिजोत्तम॥वाजिनस्तेसमाख्याताःसूर्योश्वःसोभवद्यतः॥शाखाभेदस्तुतेषांवैदशापंचचवाजिनां॥काण्वाद्यास्तुमहाभागायाज्ञवल्क्यमकीर्तिताः॥इति॥ततुरुःवैशंपायनोयानिनवेत्तितेषांव्यासेनानुपदिष्टत्वादितिभावः॥वाजिनःसमाख्याताःवाजिरूपसूर्यप्रोक्तसंहिताध्यायित्वात्॥अग्निपुराणेपि॥काण्वामाध्यंदिनीसंज्ञाकण्वीमाध्यकण्वीतथा॥मैत्रायणीयसंज्ञाचतैत्तिरीयाभिधायिका॥वैशंपायनिकेत्याद्याःशाखायाजुषसंज्ञिताइति॥आदिशब्देनरातदन्याःशाखाग्रहणं॥ततुरुंनृसिंहपराशरे॥प्रथमोयाज्ञवल्क्यश्चआपस्तंबोद्वितीयकः॥तृतीयोमूलघटकश्चतुर्थोबाणसम्मतः॥पंचमःसहवासश्चषष्ठःस्याद्धो १

त्रपंडितः॥रामानुजःसप्तमोक्तारुष्टमश्चगयावटः॥त्रिदंडीनवमःप्रोक्तोनवशाखाःप्रकीर्तिताः॥तन्मध्येसहवासस्तुकर्मनिष्ठोद्विजाग्रणी॥एवंशाखादेशभेदात्बहवस्तुद्विजातयः॥तत्रापिकर्मनिष्ठाश्चग्राह्यायज्ञादिकर्मसु॥हीनाद्विजातयःसर्वेत्याज्याःसर्वत्रकर्मसु॥हीनाद्विजातयःअभीरादयः॥परदेशेत्रिदंडेवेषधारिणः॥सन्यासिनःस्वग्रामेपरिग्रहयुक्तास्तेत्रिदंडिनः॥गोत्रपंडितःवैश्ययाजकः॥मूलघटकः नागवल्लीरोपकः॥तिर्गुळाइतिप्रसिद्धाः॥अन्येवाणसादिप्रसिद्धाः॥केचित्धर्मशास्त्रानभिज्ञाः॥यानप्रस्थाज्ज्ञातावाणसाइतिवदंतितद्दाक्ष्यंआरूढपतितपरं॥तदुक्तंकौर्मेवानप्रस्थाश्रमधर्मे॥यस्तुपत्न्यावनंगत्वामैथुनंकामतःश्चरेत्॥तद्व्रतंतस्यलुप्येतप्रायश्चित्तीपतेद्विजः॥तत्रयोजायतेधर्मोनसंस्पृश्योद्विजातिभिः॥नहिवेदेधिकारोस्यतद्वद्योप्येवमेवहि॥आरूढपतितःप्रोक्तोमुनिभिस्तत्वदर्शिभिरिति॥वाजसनीयवेदोत्पत्तिरित्यर्थः॥काण्वमाध्यंदिनाःशाखीयाःस्थापायनीयाःकापालाःपौंड्रवत्साः॥आवटिकाःपरमावटिकाःपाराशर्यावैधेयावैनेयाःऔधेयागालवाबैजवाःकात्यायनीयाश्चेति॥पंचदशशाखारित्यर्थः॥प्रतिपदमनुपदं॥अतिपदमनुपदमन्यपदंकर्तव्यमित्यर्थः॥छंदःछंदोरत्नाकरादि॥भाषाशब्दःपरिभाषा॥धर्मशास्त्रंमिताक्षरादि॥मीमांसाप्रसिद्धा॥न्यायस्तर्कः॥इतिषडंगानि॥उपज्योतिषंज्योतिःशास्त्रं॥सांगलक्षणंसामुद्रकादि॥प्रतिज्ञानुवाक्यःअनेनवाक्येनअयंसिद्धांतः॥परिसंख्याभूगोलादिः॥अतश्चरणव्यूहः॥श्राद्धकल्पः॥प्रवराध्यायश्च॥शास्त्रक्रतुसंख्याकल्पादिषुज्ञातव्या॥अनुगमयज्ञक्रिया॥पार्श्वेनिहोत्रिकं॥यज्ञक्रियाहौत्रं॥पशवोक्थानिपशुयज्ञः॥कूर्मलक्षणंयज्ञेप्रसिद्धं॥इतिअष्टादशपरिशिष्टानिभवंति॥हेसहस्रेज्ञातेन्यूनेमंत्रेवाजसनेयके॥इत्युक्तंपरिसंख्यातमेतत्सकलंपशुक्रियं॥वाजसनेयकेवेदेनवशताधिकसहस्रमंत्रा॥इत्यर्थः॥एतत्सकलंसशुक्रियंमध्यान्हेशुक्लवर्णेन सूर्येणदत्तःसशुक्रयज्ञः॥परिसंख्यातमित्यर्थः॥वेदोपक्रमणेचतुर्दशीपौर्णिमायहणात्शुक्लयज्ञः॥प्रतिपदायुक्तपौर्णिमायहणात्कृष्णयजुरितिवा॥ब्राह्मणंचचतुर्गुणं॥वेदश्चतुर्गुणंब्राह्मणमित्यर्थः॥यजुर्वेदोत्तरोरासन्शाखाएकोत्तरंशतं॥

तत्रापिद्विवाकाग्रादशपंचचवाजिनां॥तत्रापिमुख्याशाखायाकाण्वसंज्ञकाः॥यंथांतरे॥तैत्तिर्यकानाहिभेदाभवंति॥औ-
रव्याकांडिकेयाश्चेति॥तेषामध्ययनपरिमाणंकांडास्तुस्त्रसविज्ञेयःप्रश्नाश्चाधिकंवैशचतुः॥चत्वारिंशत्तुविज्ञेयाअनुवा
काःशतानिषट्॥एकपंचाशदधिकसंख्यापंनाद्विउच्यते॥द्विसहस्रंचैकशतमष्टनवतिचाधिका॥लक्षैकंतुद्विनवतिस
हस्राणिप्रकीर्तिता॥पदानिनवतिश्चैवतथाअक्षरउच्यते॥लक्षद्वयंत्रिपंचाशत्सहस्राणिशताष्टकं॥अष्टषष्ट्यधिकं
चैवयजुर्वेदप्रमाणकः॥कांडानि॥७॥प्रश्नः४४०अनुवाकाः६५१पंनादी२१८ पदानि१९२११०अक्षराणि२५३८६८ शाखवा
क्यान्ययुतानिसहस्राणिनवानिच॥चतुःशतान्यशीतिश्चअष्टौवाक्यानिगण्यते॥इतिब्राह्मणेअष्टौवाक्यसंख्या१९४८०इ
तितैत्तिरीयनिगदवेदाख्यसंख्याउक्तेत्यर्थः॥तत्रकगनांत्वपगायतुचतुश्चत्वारिंशदुपग्रंथाः॥मंत्रब्राह्मणयोर्वेदस्त्रिगु
णंयत्रपठ्यते॥यजुर्वेदःसविज्ञेयअन्येशाखांतराःस्मृताः॥चतुश्चत्वारिंशत्युपग्रंथाः॥अध्यायःसमीपेउक्ताःचतुश्चत्वा-
रिंशत्॥मंत्रश्चब्राह्मणंचमंत्रब्राह्मणेतयोःमंत्रब्राह्मणाःतयोश्चवेदइतिसंज्ञा॥तदुक्तं॥मंत्रब्राह्मणयोर्वेदइतिनामधेयमित्य
कशाखीयभाष्यकारेणआपस्तंबसामान्यसूत्रभाष्यकारेणकपर्दिनाधूर्तस्वामिनाचमंत्रोनामसंहिमंत्रस्तादृक्मंत्ररूपसं
हितायाःतन्मध्येएवतद्ग्रेब्राह्मणत्वेनपठनमित्युभयथापिसंहितात्वेनपदत्वेनक्रमत्वेनचपठनंत्रिगुणंपठनमितिसमंत्र
स्था ब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यतइत्यर्थः।एतादृशपठनंशाखायाअध्ययनंसयजुर्वेदस्तच्चैतैत्तिरीयशाखा मेवास्ति॥
तथाहिसंपत्स्यामिप्रजाअहमिडप्रजसोमानवीरितिसंहितामंत्रः॥एतस्यैवब्राह्मणंसंहितायामेवतद्ग्रएवसंपत्स्या
मिप्रजाअहमित्याहयावंतएवेतिब्राह्मणमित्युभयोरपिसंहितात्वेनपदत्वेनक्रमत्वेनपठनंत्रिगुणितपठनंभवति॥एता
॥एतादृशउदाहरणांतरमाह॥इमामगृभ्णन्रशनामृतस्यपूर्वआयुषिविदथेषितिसंहितामंत्रः॥एतस्यैवब्राह्मणंसं
हितायामेवतद्ग्रेएवसंहितारूपेणवर्तते॥तत्कथमित्यपेक्षायामाह॥इमामगृभ्णन्रशनामृतस्येत्यभिधानीमादत्त १०

इतिब्राह्मणं॥अनयोरपित्रिगुणत्वेनपठनं॥उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयइतित्रिगुणेनपठनंभवति।एतेत्रिगुणाः
कस्माअपिशाखायांनभवंति॥किंतुगाथाग्रंथत्वात्।एवमन्यानिबहून्यपिवाक्यानिसंतितानिविस्तारभयान्नोक्तानि।अतःका
रणात्॥अन्येशाखांतरास्मृताः॥तेषामध्ययनंप्रवचनीयाश्चेति।एतेषांशाखानांअध्ययनंप्रवचनीयाःप्रतिवचनीयत्वेनसमा-
प्तिमित्यर्थः॥२॥इतिचरणव्यूहेद्वितीयखंडेव्याख्यासमाप्ता॥ सामवेदस्यसहस्रभेदाआसीदनध्यायेषधीयानास्तेवज्रे
णशक्रेणाभिहताःप्रनष्टाःशेषान्प्रवक्ष्याम्यासुरायणीयावासुरायणीयाःप्राजलऋग्वैर्नभिधाःप्राचीनयोग्यानयोग्याश्चेतितत्रराणा
यनीयानामनवभेदाभवंतिराणायनीयाःशाट्यायनीयाःसात्यमुद्गलाःखल्वल्वाम्हारखल्वलाःलांगलागोशुभागोतमजैमिनीया
श्चेतितेषामध्ययनमष्टादशानिदशतिदशासप्तसप्तवालखिल्याःसुपर्णाःप्रैस्यरातत्सामगणंस्मृतं॥३॥ओमासांषोडशशाखानां
मध्येतिस्रःशाखावियंते।ताश्चगुर्जरदेशेकौथुमीप्रसित्था।कर्नाटकेजैमिनीप्रसित्था॥महाराष्ट्रदेशेजैमिनीयेति।एषामध्यय
नं।अष्टौसामसहस्राणिछंदोगार्चिकसंहिता॥गानानितस्यवक्ष्यामिसहस्राणिचतुर्दश॥अष्टौशाताानिज्ञेयानिदशोत्तरास्त
थैवच।ब्राह्मणीचोपनिषदंसहस्रत्रितयंतथा॥३॥अथर्ववेदस्यनवभेदाभवंतिपैप्पलादांताःप्रदांतास्तौताऔताब्रह्मदाबला
शौनकीवेददर्शीचरणव्यूहंविद्याश्चेतितषामध्ययनंपंचकल्पानिभवंतिकल्पेकल्पेपंचशतैरपिनक्षत्रकल्पोविधानकल्पोविवि
धानकल्पःसंहिताकल्पःशांतिकल्पश्चेतिसर्वेषामपिवेदानामुपवेदाभवंतिऋग्वेदस्यायुर्वेदोपवेदोयजुर्वेदस्यधनुर्वेदोपवेदोः
सामवेदस्यगांधर्ववेदोपवेदोथर्वणवेदस्यास्त्रशास्त्राणिभवंतिऋग्वेदस्यात्रेयगोत्रंब्रह्मदैवत्यंगायत्रंछंदोयजुर्वेदस्यभारद्वा
जगोत्रंरुद्रदैवत्यंत्रैष्टुभंछंदः॥सामवेदस्यकाश्यपगोत्रंविष्णुदैवत्यंजागतंछंदोथर्वणवेदस्यवैजानगोत्रंमिंद्रदैवत्यमानुष्टुप्
छंदऋग्वेदोरुक्मवर्णःपद्मपत्रायताक्षःसुविभक्तग्रीवःकुंचितकेशश्मश्रुप्रमाणंद्विरलिमात्रं॥यजुर्वेदःकृशोदीर्घकपालीता
म्रवर्णःकांचननयनःश्वेतवर्णोवर्णेनपंचारत्निमात्रः॥सामवेदोनित्यस्रग्वीशुचिःशुचौवाससीक्षौमीदांतीचर्मीदंडीआदि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

च॰ व्या॰ त्यवर्णोवर्णेनषड्लिमात्रोर्थर्ववेदस्तीक्ष्णश्चंडःरुग्मःकामःकामरूपास्तुद्रकर्मीचैवसांख्यसहिश्चसन्मृजगलमूर्ध्निगालवः
११ स्वदारपृष्ठःपरदारएवश्येयिनीनीलोत्पलवर्णोवर्णेनदत्रारलिमात्रः॥यद्गमंदेवतंरूपंगोत्रभ्रमाणंछंदोवर्णोवर्णइतिजन्म-
जन्मनिवेदधारोभवतिजन्मजन्मनिवेदपारोभवत्यव्रतव्रतोभवत्यप्रहिताःप्रहितोभवत्यब्रह्मचारीब्रह्मचारीभवतिजातिः
स्मरोजायतेनमःशौनकायनमःशौनकाय॥४॥ ॥यद्गमंचरणंव्यूहंपर्वसुश्रावयेद्द्विजः॥धौतपाप्माशुचिर्विप्रोब्रह्मभूया
यकल्पते॥१॥यद्गमंचरणव्यूहंश्राद्धकालेतुयःपठेत्॥अक्षय्यंतद्भवेच्छ्राद्धंपितृणांतृप्तिमक्षयं॥२॥यद्गमंचरणव्यूहंग-
र्भिण्यांश्रावयेत्स्त्रियां॥पुमांसंजनयेत्पुत्रंसर्वज्ञंवेदपारगं॥३॥योधीतेचरणव्यूहःसविप्रःपंक्तिपावनः॥तारयत्यखिला-
ल्सर्वान्पुरुषान्सप्तसप्तच॥योनिमानिपरोवेदाअमृतत्वंचगच्छति॥लोकातीतंमहाशांतंममृतत्वंचगच्छत्योनमस्त्याहभ
गवान्व्यासःपाराशर्योव्यासःपाराशर्योनमःपरमऋषिभ्योनमःपरमऋषिभ्यः॥५॥छंदःपादौतुवेदस्यहस्तौकल्पोतपठ्य
ते॥ज्योतिषामयनंचक्षुर्निरुक्तंश्रोत्रमुच्यते॥६॥शिक्षाघ्राणंतुवेदस्यमुखंव्याकरणंस्मृतं॥तस्मात्सांगमधीत्यैवब्रह्मलोके
महीयते॥७॥इतिधृतिशिवाद्भामाचत्वारोवेदपत्निका॥ज्ञातव्यायज्ञकालेषुईशानादेव्यवस्थिता॥लक्षंतुचतुरोवेदालक्षं
भारतमेवच॥लक्षंव्याकरणंप्रोक्तंचतुर्लक्षंतुज्योतिषं॥इतिचानुर्वेदपाठसंपूर्णः॥शुभमस्तुलेखकमननकारिणोः॥
सांबसदाशिवार्पणमस्तु॥ दत्त॥ देव॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥